# tArAsahasranamastotra from Brihannilatantra

# તારાસહસ્રનામસ્તોત્રમ્ બૃહન્નીલતન્ત્રાર્ગતમ્

## Document Information

Text title : tArAsahasranAmastotram bRRihannIlatantrAntargatam

File name : tArAsahasranAmastotrambRRihannIla.itx

Category : sahasranAma, devii, dashamahAvidyA, stotra, devI

Location : doc_devii

Transliterated by : muktabodha.org

Proofread by : DPD

Description-comments : Brihannilatantra

Acknowledge-Permission: Marjorie Woollacott, Ph.D., Digital Library Coordinator muktabodha.org

Latest update : March 8, 2013

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# તારાસહસ્રનામસ્તોત્રમ્ બૃહન્નીલતન્ત્રાર્ગતમ્

શ્રીદેવ્યુવાચ ।

દેવ દેવ મહાદેવ સૃષ્ટિસ્થિત્યન્તકારક ।
પ્રસઙ્ગેન મહાદેવ્યા વિસ્તરં કથિતં મયિ ॥ ૧૮-૧॥

દેવ્યા નીલસરસ્વત્યાઃ સહસ્રં પરમેશ્વર ।
નામ્નાં શ્રોતું મહેશાન પ્રસાદઃ ક્રિયતાં મયિ ।
કથયસ્વ મહાદેવ યદ્યહં તવ વલ્લભા ॥ ૧૮-૨॥

શ્રીભૈરવ ઉવાચ ।

સાધુ પૃષ્ટં મહાદેવિ સર્વતન્ત્રેષુ ગોપિતમ્ ।
નામ્નાં સહસ્રં તારાયાઃ કથિતું નૈવ શક્યતે ॥ ૧૮-૩॥

પ્રકાશાત્ સિદ્ધિહાનિઃ સ્યાત્ શ્રિયા ચ પરિહીયતે ।
પ્રકાશયતિ યો મોહાત્ ષણ્માસાદ્ મૃત્યુમાપ્નુયાત્ ॥ ૧૮-૪॥

અકથ્યં પરમેશાનિ અકથ્યં ચૈવ સુન્દરિ ।
ક્ષમસ્વ વરદે દેવિ યદિ સ્નેહોઽસ્તિ માં પ્રતિ ॥ ૧૮-૫॥

સર્વસ્વં શ‍ૃણુ હે દેવિ સર્વાગમવિદાં વરે ।
ધનસારં મહાદેવિ ગોપ્તવ્યં પરમેશ્વરિ ॥ ૧૮-૬॥

આયુર્ગોપ્યં ગૃહચ્છિદ્રં ગોપ્યં ન પાપભાગ્ ભવેત્ ।
સુગોપ્યં પરમેશાનિ ગોપનાત્ સિદ્ધિમશ્નુતે ॥ ૧૮-૭॥

પ્રકાશાત્ કાર્યહાનિશ્ચ પ્રકાશાત્ પ્રલયં ભવેત્ ।
તસ્માદ્ ભદ્રે મહેશાનિ ન પ્રકાશ્યં કદાચન ॥ ૧૮-૮॥

ઇતિ દેવવચઃ શ્રુત્વા દેવી પરમસુન્દરી ।
વિસ્મિતા પરમેશાની વિષણ્ણા તત્ર જાયતે ॥ ૧૮-૯॥

શ‍ૃણુ હે પરમેશાન કૃપાસાગરપારગ ।

તવ સ્નેહો મહાદેવ મયિ નાસ્ત્યત્ર નિશ્ચિતમ્ ॥ ૧૮-૧૦॥

ભદ્રં ભદ્રં મહાદેવ ઇતિ કૃત્વા મહેશ્વરી ।
વિમુખીભૂય દેવેશી તત્રાસ્તે શૈલજા શુભા ॥ ૧૮-૧૧॥

વિલોક્ય વિમુખીં દેવીં મહાદેવો મહેશ્વરઃ ।
પ્રહસ્ય પરમેશાનીં પરિષ્વજ્ય પ્રિયાં કથામ્ ॥ ૧૮-૧૨॥

કથયામાસ તત્રૈવ મહાદેવ્યૈ મહેશ્વરિ ।
મમ સર્વસ્વરૂપા ત્વં જાનીહિ નગનન્દિનિ ॥ ૧૮-૧૩॥

ત્વાં વિનાહં મહાદેવિ પૂર્વોક્તશવરૂપવાન્ ।
ક્ષમસ્વ પરમાનન્દે ક્ષમસ્વ નગનન્દિનિ ॥ ૧૮-૧૪॥

યથા પ્રાણો મહેશાનિ દેહે તિષ્ઠતિ સુન્દરિ ।
તથા ત્વં જગતામાદ્યે ચરણે પતિતોઽસ્મ્યહમ્ ॥ ૧૮-૧૫॥

ઇતિ મત્વા મહાદેવિ રક્ષ માં તવ કિઙ્કરમ્ ।
તતો દેવી મહેશાની ત્રૈલોક્યમોહિની શિવા ॥ ૧૮-૧૬॥

મહાદેવં પરિષ્વજ્ય પ્રાહ ગદ્ગદયા ગિરા ।
સદા દેહસ્વરૂપાહં દેહી ત્વં પરમેશ્વર ॥ ૧૮-૧૭॥

તથાપિ વઞ્ચનાં કર્તું મામિત્થં વદસિ પ્રિયમ્ ।
મહાદેવઃ પુનઃ પ્રાહ ભૈરવિ પ્રાણવલ્લભે ॥ ૧૮-૧૮॥

નામ્નાં સહસ્રં તારાયાઃ શ્રોતુમિચ્છસ્યશેષતઃ ।

શ્રીદેવ્યુવાચ ।

ન શ્રુતં પરમેશાન તારાનામસહસ્રકમ્ ।
કથયસ્વ મહાભાગ સત્યં પરમસુન્દરમ્ ॥ ૧૮-૧૯॥

શ્રીપાર્વત્યુવાચ ।

કથમીશાન સર્વજ્ઞ લભન્તે સિદ્ધિમુત્તમામ્ ।
સાધકાઃ સર્વદા યેન તન્મે કથય સુન્દર ॥ ૧૮-૨૦॥

યસ્માત્ પરતરં નાસ્તિ સ્તોત્રં તન્ત્રેષુ નિશ્ચિતમ્ ।
સર્વપાપહરં દિવ્યં સર્વાપદ્વિનિવારકમ્ ॥ ૧૮-૨૧॥

સર્વજ્ઞાનકરં પુણ્યં સર્વમઙ્ગલસંયુતમ્ ।

પુરશ્ચર્યાશતૈસ્તુલ્યં સ્તોત્રં સર્વપ્રિયઙ્કરમ્ ॥ ૧૮-૨૨॥

વશ્યપ્રદં મારણદમુચ્ચાટનપ્રદં મહત્ ।
નામ્નાં સહસ્રં તારાયાઃ કથયસ્વ સુરેશ્વર ॥ ૧૮-૨૩॥

શ્રીમહાદેવ ઉવાચ ।

નામ્નાં સહસ્રં તારાયાઃ સ્તોત્રપાઠાદ્ ભવિષ્યતિ ।
નામ્નાં સહસ્રં તારાયાઃ કથયિષ્યામ્યશેષતઃ ॥ ૧૮-૨૪॥

શ઼ૃણુ દેવિ સદા ભક્ત્યા ભક્તાનાં પરમં હિતમ્ ।
વિના પૂજોપહારેણ વિના જા(પ્યેન યત્ ફલમ્ ॥ ૧૮-૨૫॥

તત્ ફલં સકલં દેવિ કથયિષ્યામિ તચ્છૃણુ ।

ૐ અસ્ય શ્રીતારાસહસ્રનામસ્તોત્રમહામન્ત્રસ્ય,
અક્ષોભ્ય ઋષિઃ, બૃહતી-ઉષ્ણિક્ છન્દઃ,
શ્રી ઉગ્રતારા શ્રીમદેકજટા શ્રીનીલસરસ્વતી દેવતા,
પુરુષાર્થચતુષ્ટયસિદ્ધ્યર્થે વિનિયોગઃ ॥

તારા રાત્રિર્મહારાત્રિર્કાલરાત્રિર્મહામતિઃ ।
કાલિકા કામદા માયા મહામાયા મહાસ્મૃતિઃ ॥ ૧૮-૨૬॥

મહાદાનરતા યજ્ઞા યજ્ઞોત્સવવિભૂષિતા ।
ચન્દ્રવ્વજા ચકોરાક્ષી ચારુનેત્રા સુલોચના ॥ ૧૮-૨૭॥

ત્રિનેત્રા મહતી દેવી કુરઙ્ગાક્ષી મનોરમા ।
બ્રાહ્મી નારાયણી જ્યોત્સ્ના ચારુકેશી સુમૂર્ધજા ॥ ૧૮-૨૮॥

વારાહી વારુણી વિદ્યા મહાવિદ્યા મહેશ્વરી ।
સિદ્ધા કુઞ્ચિતકેશા ચ મહાયજ્ઞસ્વરૂપિણી ॥ ૧૮-૨૯॥

ગૌરી ચમ્પકવર્ણા ચ કૃશાઙ્ગી શિવમોહિની ।
સર્વાનન્દસ્વરૂપા ચ સર્વશઙ્કૈકતારિણી ॥ ૧૮-૩૦॥

વિદ્યાનન્દમયી નન્દા ભદ્રકાલીસ્વરૂપિણી ।
ગાયત્રી સુચરિત્રા ચ કૌલવ્રતપરાયણા ॥ ૧૮-૩૧॥

હિરણ્યગર્ભા ભૂગર્ભા મહાગર્ભા સુલોચની ।
હિમવત્તનયા દિવ્યા મહામેઘસ્વરૂપિણી ॥ ૧૮-૩૨॥

જગન્માતા જગદ્ધાત્રી જગતામુપકારિણી ।
ઐન્દ્રી સૌમ્યા તથા ઘોરા વારુણી માધવી તથા ॥ ૧૮-૩૩ ॥

આગ્નેયી નૈરૃતી ચૈવ ઐશાની ચણ્ડિકાત્મિકા ।
સુમેરુતનયા નિત્યા સર્વેષામુપકારિણી ॥ ૧૮-૩૪ ॥

લલજ્જિહ્વા સરોજાક્ષી મુણ્ડસ્રક્પરિભૂષિતા ।
સર્વાનન્દમયી સર્વા સર્વાનન્દસ્વરૂપિણી ॥ ૧૮-૩૫ ॥

ધૃતિર્મેધા તથા લક્ષ્મીઃ શ્રદ્ધા પન્નગગામિની ।
રુક્મિણી જાનકી દુર્ગામ્બિકા સત્યવતી રતિઃ ॥ ૧૮-૩૬ ॥ ૧૮-

કામાખ્યા કામદા નન્દા નારસિંહી સરસ્વતી ।
મહાદેવરતા ચણ્ડી ચણ્ડદોર્દણ્ડખણ્ડિની ॥ ૧૮-૩૭ ॥

દીર્ઘકેશી સુકેશી ચ પિઙ્ગકેશી મહાકચા ।
ભવાની ભવપત્ની ચ ભવભીતિહરા સતી ॥ ૧૮-૩૮ ॥

પૌરન્દરી તથા વિષ્ણોર્જાયા માહેશ્વરી તથા ।
સર્વેષાં જનની વિદ્યા ચાર્વઙ્ગી દૈત્યનાશિની ॥ ૧૮-૩૯ ॥

સર્વરૂપા મહેશાનિ કામિની વરવર્ણિની ।
મહાવિદ્યા મહામાયા મહામેધા મહોત્સવા ॥ ૧૮-૪૦ ॥

વિરૂપા વિશ્વરૂપા ચ મૃડાની મૃડવલ્લભા ।
કોટિચન્દ્રપ્રતીકાશા શતસૂર્યપ્રકાશિની ॥ ૧૮-૪૧ ॥

જહ્નુકન્યા મહોગ્રા ચ પાર્વતી વિશ્વમોહિની ।
કામરૂપા મહેશાની નિત્યોત્સાહા મનસ્વિની ॥ ૧૮-૪૨ ॥

વૈકુણ્ઠનાથપત્ની ચ તથા શઙ્કરમોહિની ।
કાશ્યપી કમલા કૃષ્ણા કૃષ્ણરૂપા ચ કાલિની ॥ ૧૮-૪૩ ॥

માહેશ્વરી વૃષારૂઢા સર્વવિસ્મયકારિણી ।
માન્યા માનવતી શુદ્ધા કન્યા હિમગિરેસ્તથા ॥ ૧૮-૪૪ ॥

અપર્ણા પદ્મપત્રાક્ષી નાગયજ્ઞોપવીતિની ।
મહાશઙ્ખધરા કાન્તા કમનીયા નગાત્મજા ॥ ૧૮-૪૫ ॥

બ્રહ્માણી વૈષ્ણવી શમ્ભોર્જાયા ગઙ્ગા જલેશ્વરી ।
ભાગીરથી મનોબુદ્ધિર્નિત્યા વિદ્યામયી તથા ॥ ૧૮-૪૬ ॥

હરપ્રિયા ગિરિસુતા હરપત્ની તપસ્વિની ।
મહાવ્યાધિહરા દેવી મહાઘોરસ્વરૂપિણી ॥ ૧૮-૪૭ ॥

મહાપુણ્યપ્રભા ભીમા મધુકૈટભનાશિની ।
શઙ્ખિની વજ્રિણી ધાત્રી તથા પુસ્તકધારિણી ॥ ૧૮-૪૮ ॥

ચામુણ્ડા ચપલા તુઙ્ગા શુમ્ભદૈત્યનિકૃન્તની ।
શાન્તિર્નિદ્રા મહાનિદ્રા પૂર્ણનિદ્રા ચ રેણુકા ॥ ૧૮-૪૯ ॥

કૌમારી કુલજા કાન્તી કૌલવ્રતપરાયણા ।
વનદુર્ગા સદાચારા દ્રૌપદી દ્રુપદાત્મજા ॥ ૧૮-૫૦ ॥

યશસ્વિની યશસ્યા ચ યશોધાત્રી યશઃપ્રદા ।
સૃષ્ટિરૂપા મહાગૌરી નિશુમ્ભપ્રાણનાશિની ॥ ૧૮-૫૧ ॥

પદ્મિની વસુધા પૃથ્વી રોહિણી વિન્ધ્યવાસિની ।
શિવશક્તિર્મહાશક્તિઃ શઙ્ખિની શક્તિનિર્ગતા ॥ ૧૮-૫૨ ॥

દૈત્યપ્રાણહરા દેવી સર્વરક્ષણકારિણી ।
ક્ષાન્તિઃ ક્ષેમઙ્કરી ચૈવ બુદ્ધિરૂપા મહાધના ॥ ૧૮-૫૩ ॥

શ્રીવિદ્યા ભૈરવિ ભવ્યા ભવાની ભવનાશિની ।
તાપિની ભાવિની સીતા તીક્ષ્ણતેજઃસ્વરૂપિણી ॥ ૧૮-૫૪ ॥

દાત્રી દાનપરા કાલી દુર્ગા દૈત્યવિભૂષણા ।
મહાપુણ્યપ્રદા ભીમા મધુકૈટભનાશિની ॥ ૧૮-૫૫ ॥

પદ્મા પદ્માવતી કૃષ્ણા તુષ્ટા પુષ્ટા તથોર્વશી ।
વજ્રિણી વજ્રહસ્તા ચ તથા નારાયણી શિવા ॥ ૧૮-૫૬ ॥

ખડ્ગિની ખડ્ગહસ્તા ચ ખડ્ગખર્પરધારિણી ।
દેવાઙ્ગના દેવકન્યા દેવમાતા પુલોમજા ॥ ૧૮-૫૭ ॥

સુખિની સ્વર્ગદાત્રી ચ સર્વસૌખ્યવિવર્ધિની ।
શીલા શીલાવતી સૂક્ષ્મા સૂક્ષ્માકારા વરપ્રદા ॥ ૧૮-૫૮ ॥

વરેણ્યા વરદા વાણી જ્ઞાનિની જ્ઞાનદા સદા ।
ઉગ્રકાલી મહાકાલી ભદ્રકાલી ચ દક્ષિણા ॥ ૧૮-૫૯ ॥

ભૃગુવંશસમુદ્ભૂતા ભાર્ગવી ભૃગુવલ્લભા ।

શૂલિની શૂલહસ્તા ચ કર્ત્રીખર્પરધારિણી ॥ ૧૮-૬૦॥

મહાવંશસમુદ્ભૂતા મયૂરવરવાહના ।
મહાશઙ્ખરતા રક્તા રક્તખર્પરધારિણી ॥ ૧૮-૬૧॥

રક્તામ્બરધરા રામા રમણી સુરનાયિકા ।
મોક્ષદા શિવદા શ્યામા મદવિભ્રમમન્થરા ॥ ૧૮-૬૨॥

પરમાનન્દદા જ્યેષ્ઠા યોગિની ગણસેવિતા ।
સારા જામ્બવતી ચૈવ સત્યભામા નગાત્મજા ॥ ૧૮-૬૩॥

રૌદ્રા રૌદ્રબલા ઘોરા રુદ્રસારારુણાત્મિકા ।
રુદ્રરૂપા મહારૌદ્રી રૌદ્રદૈત્યવિનાશિની ॥ ૧૮-૬૪॥

કૌમારી કૌશિકી ચણ્ડા કાલદૈત્યવિનાશિની ।
શમ્ભુપત્ની શમ્ભુરતા શમ્ભુજાયા મહોદરી ॥ ૧૮-૬૫॥

શિવપત્ની શિવરતા શિવજાયા શિવપ્રિયા ।
હરપત્ની હરરતા હરજાયા હરપ્રિયા ॥ ૧૮-૬૬॥

મદનાન્તકકાન્તા ચ મદનાન્તકવલ્લભા ।
ગિરિજા ગિરિકન્યા ચ ગિરીશસ્ય ચ વલ્લભા ॥ ૧૮-૬૭॥

ભૂતા ભવ્યા ભવા સ્પષ્ટા પાવની પરપાલિની ।
અદૃશ્યા ચ વ્યક્તરૂપા ઇષ્ટાનિષ્ટપ્રવર્દ્ધિની ॥ ૧૮-૬૮॥

અચ્યુતા પ્રચ્યુતપ્રાણા પ્રમદા વાસવેશ્વરી ।
અપાંનિધિસમુદ્ભૂતા ધારિણી ચ પ્રતિષ્ઠિતા ॥ ૧૮-૬૯॥

ઉદ્ભવા ક્ષોભણા ક્ષેમા શ્રીગર્ભા પરમેશ્વરી ।
કમલા પુષ્પદેહા ચ કામિની કજ્જલોચના ॥ ૧૮-૭૦॥

શરણ્યા કમલા પ્રીતિર્વિમલાનન્દવર્ધિની ।
કપર્દિની કરાલા ચ નિર્મલા દેવરૂપિણી ॥ ૧૮-૭૧॥

ઉદીર્ણભૂષણા ભવ્યા સુરસેના મહોદરી ।
શ્રીમતી શિશિરા નવ્યા શિશિરાચલકન્યકા ॥ ૧૮-૭૨॥

સુરમાન્યા સુરશ્રેષ્ઠા જ્યેષ્ઠા પ્રાણેશ્વરી સ્થિરા ।
તમોઘ્ની ધ્વાન્તસંહન્ત્રી પ્રયતાત્મા પતિવ્રતા ॥ ૧૮-૭૩॥

પ્રદ્યોતિની રથારૂઢા સર્વલોકપ્રકાશિની ।
મેધાવિની મહાવીર્યા હંસી સંસારતારિણી ॥ ૧૮-૭૪॥

પ્રણતપ્રાણિનામાર્તિહારિણી દૈત્યનાશિની ।
ડાકિની શાકિનીદેવી વરખટ્વાઙ્ગધારિણી ॥ ૧૮-૭૫॥

કૌમુદી કુમુદા કુન્દા કૌલિકા કુલજામરા ।
ગર્વિતા ગુણસમ્પન્ના નગજા ખગવાહિની ॥ ૧૮-૭૬॥

ચન્દ્રાનના મહોગ્રા ચ ચારુમૂર્ધજશોભના ।
મનોજ્ઞા માધવી માન્યા માનનીયા સતાં સુહૃત્ ॥ ૧૮-૭૭॥

જ્યેષ્ઠા શ્રેષ્ઠા મઘા પુષ્યા ધનિષ્ઠા પૂર્વફાલ્ગુની ।
રક્તબીજનિહન્ત્રી ચ રક્તબીજવિનાશિની ॥ ૧૮-૭૮॥

ચણ્ડમુણ્ડનિહન્ત્રી ચ ચણ્ડમુણ્ડવિનાશિની ।
કર્ત્રી હર્ત્રી સુકર્ત્રી ચ વિમલામલવાહિની ॥ ૧૮-૭૯॥

વિમલા ભાસ્કરી વીણા મહિષાસુરઘાતિની ।
કાલિન્દી યમુના વૃદ્ધા સુરભિઃ બાલિકા સતી ॥ ૧૮-૮૦॥

કૌશલ્યા કૌમુદી મૈત્રીરૂપિણી ચાપ્યરુન્ધતી ।
પુરારિગૃહિણી પૂર્ણા પૂર્ણાનન્દસ્વરૂપિણી ॥ ૧૮-૮૧॥

પુણ્ડરીકાક્ષપત્ની ચ પુણ્ડરીકાક્ષવલ્લભા ।
સમ્પૂર્ણચન્દ્રવદના બાલચન્દ્રસમપ્રભા ॥ ૧૮-૮૨॥

રેવતી રમણી ચિત્રા ચિત્રામ્બરવિભૂષણામ્ ।
સીતા વીણાવતી ચૈવ યશોદા વિજયા પ્રિયા ॥ ૧૮-૮૩॥

નવપુષ્પસમુદ્ભૂતા નવપુષ્પોત્સવોત્સવા ।
નવપુષ્પસ્રજામાલા માલ્યભૂષણભૂષિતા ॥ ૧૮-૮૪॥

નવપુષ્પસમપ્રાણા નવપુષ્પોત્સવપ્રિયા ।
પ્રેતમણ્ડલમધ્યસ્તા સર્વાઙ્ગસુન્દરી શિવા ॥ ૧૮-૮૫॥

નવપુષ્પાત્મિકા ષષ્ઠી પુષ્પસ્તવકમણ્ડલા ।
નવપુષ્પગુણોપેતા શ્મશાનભૈરવપ્રિયા ॥ ૧૮-૮૬॥

કુલશાસ્ત્રપ્રદીપા ચ કુલમાર્ગપ્રવર્દ્ધિની ।
શ્મશાનભૈરવી કાલી ભૈરવી ભૈરવપ્રિયા ॥ ૧૮-૮૭॥

આનન્દભૈરવી ધ્યેયા ભૈરવી કુરુભૈરવી ।
મહાભૈરવસમ્પ્રીતા ભૈરવીકુલમોહિની ॥ ૧૮-૮૮॥

શ્રીવિદ્યાભૈરવી નીતિભૈરવી ગુણભૈરવી ।
સમ્મોહભૈરવી પુષ્ટિભૈરવી તુષ્ટિભૈરવી ॥ ૧૮-૮૯॥

સંહારભૈરવી સૃષ્ટિભૈરવી સ્થિતિભૈરવી ।
આનન્દભૈરવી વીરા સુન્દરી સ્થિતિસુન્દરી ॥ ૧૮-૯૦॥

ગુણાનન્દસ્વરૂપા ચ સુન્દરી કાલરૂપિણી ।
શ્રીમાયાસુન્દરી સૌમ્યસુન્દરી લોકસુન્દરી ॥ ૧૮-૯૧॥

શ્રીવિદ્યામોહિની બુદ્ધિર્મહાબુદ્ધિસ્વરૂપિણી ।
મલ્લિકા હારરસિકા હારાલમ્બનસુન્દરી ॥ ૧૮-૯૨॥

નીલપઙ્કજવર્ણા ચ નાગકેસરભૂષિતા ।
જપાકુસુમસઙ્કાશા જપાકુસુમશોભિતા ॥ ૧૮-૯૩॥

પ્રિયા પ્રિયઙ્કરી વિષ્ણોર્દાનવેન્દ્રવિનાશિની ।
જ્ઞાનેશ્વરી જ્ઞાનદાત્રી જ્ઞાનાનન્દપ્રદાયિની ॥ ૧૮-૯૪॥

ગુણગૌરવસમ્પન્ના ગુણશીલસમન્વિતા ।
રૂપયૌવનસમ્પન્ના રૂપયૌવનશોભિતા ॥ ૧૮-૯૫॥

ગુણાશ્રયા ગુણરતા ગુણગૌરવસુન્દરી ।
મદિરામોદમત્તા ચ તાટઙ્કદ્વયશોભિતા ॥ ૧૮-૯૬॥

વૃક્ષમૂલસ્થિતા દેવી વૃક્ષશાખોપરિસ્થિતા ।
તાલમધ્યાગ્રનિલયા વૃક્ષમધ્યનિવાસિની ॥ ૧૮-૯૭॥

સ્વયમ્ભૂપુષ્પસંકાશા સ્વયમ્ભૂપુષ્પધારિણી ।
સ્વયમ્ભૂકુસુમપ્રીતા સ્વયમ્ભૂપુષ્પશોભિની ॥ ૧૮-૯૮॥

સ્વયમ્ભૂપુષ્પરસિકા નગ્ના ધ્યાનવતી સુધા ।
શુક્રપ્રિયા શુક્રરતા શુક્રમજ્જનતત્પરા ॥ ૧૮-૯૯॥

પૂર્ણપર્ણા સુપર્ણા ચ નિષ્પર્ણા પાપનાશિની ।
મદિરામોદસમ્પન્ના મદિરામોદધારિણી ॥ ૧૮-૧૦૦॥

સર્વાશ્રયા સર્વગુણા નન્દનન્દનધારિણી ।

નારીપુષ્પસમુદ્ભૂતા નારીપુષ્પોત્સવોત્સવા ॥ ૧૮-૧૦૧॥

નારીપુષ્પસમપ્રાણા નારીપુષ્પરતા મૃગી ।
સર્વકાલોદ્ભવપ્રીતા સર્વકાલોદ્ભવોત્સવા ॥ ૧૮-૧૦૨॥

ચતુર્ભુજા દશભુજા અષ્ટાદશભુજા તથા ।
દ્વિભુજા ષડ્ભુજા પ્રીતા રક્તપઙ્કજશોભિતા ॥ ૧૮-૧૦૩॥

કૌબેરી કૌરવી કૌર્યા કુરુકુલ્લા કપાલિની ।
સુદીર્ઘકદલીજઙ્ઘા રમ્ભોરૂ રામવલ્લભા ॥ ૧૮-૧૦૪॥

નિશાચરી નિશામૂર્તિર્નિશાચન્દ્રસમપ્રભા ।
ચાન્દ્રી ચાન્દ્રકલા ચન્દ્રા ચારુચન્દ્રનિભાનના ॥ ૧૮-૧૦૫॥

સ્રોતસ્વતી સ્રુતિમતી સર્વદુર્ગતિનાશિની ।
સર્વાધારા સર્વમયી સર્વાનન્દસ્વરૂપિણી ॥ ૧૮-૧૦૬॥

સર્વચક્રેશ્વરી સર્વા સર્વમન્ત્રમયી શુભા ।
સહસ્રનયનપ્રાણા સહસ્રનયનપ્રિયા ॥ ૧૮-૧૦૭॥

સહસ્રશીર્ષા સુષમા સદમ્ભા સર્વભક્ષિકા ।
યષ્ટિકા યષ્ટિચક્રસ્થા ષડ્વર્ગફલદાયિની ॥ ૧૮-૧૦૮॥

ષટ્ત્રિંશપદ્મમધ્યસ્થા ષટ્ત્રિંશકુલમધ્યગા ।
હૂઁકારવર્ણનિલયા હૂઁકારાક્ષરભૂષણા ॥ ૧૮-૧૦૯॥

હકારવર્ણનિલયા હકારાક્ષરભૂષણા ।
હારિણી હારવલિતા હારહીરકભૂષણા ॥ ૧૮-૧૧૦॥

હ્રીંકારબીજસહિતા હ્રીંકારૈરુપશોભિતા ।
કન્દર્પસ્ય કલા કુન્દા કૌલિની કુલદર્પિતા ॥ ૧૮-૧૧૧॥

કેતકીકુસુમપ્રાણા કેતકીકૃતભૂષણા ।
કેતકીકુસુમાસક્તા કેતકીપરિભૂષિતા ॥ ૧૮-૧૧૨॥

કર્પૂરપૂર્ણવદના મહામાયા મહેશ્વરી ।
કલા કેલિઃ ક્રિયા કીર્ણા કદમ્બકુસુમોત્સુકા ॥ ૧૮-૧૧૩॥

કાદમ્બિની કરિશુણ્ડા કુઞ્જરેશ્વરગામિની ।
ખર્વા સુખઞ્જનયના ખઞ્જનદ્વન્દ્વભૂષણા ॥ ૧૮-૧૧૪॥

ખદ્યોત ઇવ દુર્લક્ષા ખદ્યોત ઇવ ચઞ્ચલા ।
મહામાયા જગદ્ધાત્રી ગીતવાદ્યપ્રિયા રતિઃ ॥ ૧૮-૧૧૫॥

ગણેશ્વરી ગણેજ્યા ચ ગુણપૂજ્યા ગુણપ્રદા ।
ગુણાઢ્યા ગુણસમ્પન્ના ગુણદાત્રી ગુણાત્મિકા ॥ ૧૮-૧૧૬॥

ગુર્વી ગુરુતરા ગૌરી ગાણપત્યફલપ્રદા ।
મહાવિદ્યા મહામેધા તુલિની ગણમોહિની ॥ ૧૮-૧૧૭॥

ભવ્યા ભવપ્રિયા ભાવ્યા ભાવનીયા ભવાત્મિકા ।
ઘર્ઘરા ઘોરવદના ઘોરદૈત્યવિનાશિની ॥ ૧૮-૧૧૮॥

ઘોરા ઘોરવતી ઘોષા ઘોરપુત્રી ઘનાચલા ।
ચર્ચરી ચારુનયના ચારુવક્ત્રા ચતુર્ગુણા ॥ ૧૮-૧૧૯॥

ચતુર્વેદમયી ચણ્ડી ચન્દ્રાસ્યા ચતુરાનના ।
ચલચ્ચકોરનયના ચલત્ખઞ્જનલોચના ॥ ૧૮-૧૨૦॥

ચલદમ્ભોજનિલયા ચલદમ્ભોજલોચના ।
છત્રી છત્રપ્રિયા છત્રા છત્રચામરશોભિતા ॥ ૧૮-૧૨૧॥

છિન્નછદા છિન્નશિરાશ્છિન્નનાસા છલાત્મિકા ।
છલાઢ્યા છલસંત્રસ્તા છલરૂપા છલસ્થિરા ॥ ૧૮-૧૨૨॥

છકારવર્ણનિલયા છકારાઢ્યા છલપ્રિયા ।
છદ્મિની છદ્મનિરતા છદ્મચ્છદ્મનિવાસિની ॥ ૧૮-૧૨૩॥

જગન્નાથપ્રિયા જીવા જગન્મુક્તિકરી મતા ।
જીર્ણા જીમૂતવનિતા જીમૂતૈરુપશોભિતા ॥ ૧૮-૧૨૪॥

જામાતૃવરદા જમ્ભા જમલાર્જુનભઞ્જિની ।
ઝઝરી ઝાકૃતિર્ઝલ્લી ઝરી ઝર્ઝરિકા તથા ॥ ૧૮-૧૨૫॥

ટઙ્કારકારિણી ટીકા સર્વટઙ્કારકારિણી ।
ઠંકરાઙ્ગી ડમરુકા ડાકારા ડમરુપ્રિયા ॥ ૧૮-૧૨૬॥

ઢક્કારાવરતા નિત્યા તુલસી મણિભૂષિતા ।
તુલા ચ તોલિકા તીર્ણા તારા તારણિકા તથા ॥ ૧૮-૧૨૭॥

તન્ત્રવિજ્ઞા તન્ત્રરતા તન્ત્રવિદ્યા ચ તન્ત્રદા ।
તાન્ત્રિકી તન્ત્રયોગ્યા ચ તન્ત્રસારા ચ તન્ત્રિકા ॥ ૧૮-૧૨૮॥

તન્ત્રધારી તન્ત્રકરી સર્વતન્ત્રસ્વરૂપિણી ।
તુહિનાંશુસમાનાસ્યા તુહિનાંશુસમપ્રભા ॥ ૧૮-૧૨૯॥

તુષારાકરતુલ્યાઙ્ગી તુષારાધારસુન્દરી ।
તન્ત્રસારા તન્ત્રકરો તન્ત્રસારસ્વરૂપિણી ॥ ૧૮-૧૩૦॥

તુષારધામતુલ્યાસ્યા તુષારાંશુસમપ્રભા ।
તુષારાદ્રિસુતા તાર્ક્ષ્યા તારાઙ્ગી તાલસુન્દરી ॥ ૧૮-૧૩૧॥

તારસ્વરેણ સહિતા તારસ્વરવિભૂષિતા ।
થકારકૂટનિલયા થકારાક્ષરમાલિની ॥ ૧૮-૧૩૨॥

દયાવતી દીનરતા દુઃખદારિદ્ર્યનાશિની ।
દૌર્ભાગ્યદુઃખદલિની દૌર્ભાગ્યપદનાશિની ॥ ૧૮-૧૩૩॥

દુહિતા દીનબન્ધુશ્ચ દાનવેન્દ્રવિનાશિની ।
દાનપાત્રી દાનરતા દાનસમ્માનતોષિતા ॥ ૧૮-૧૩૪॥

દાન્ત્યાદિસેવિતા દાન્તા દયા દામોદરપ્રિયા ।
દધીચિવરદા તુષ્ટા દાનવેન્દ્રવિમર્દિની ॥ ૧૮-૧૩૫॥

દીર્ઘનેત્રા દીર્ઘકચા દીર્ઘનાસા ચ દીર્ઘિકા ।
દારિદ્ર્યદુઃખસંનાશા દારિદ્ર્યદુઃખનાશિની ॥ ૧૮-૧૩૬॥

દામ્ભિકા દન્તુરા દમ્ભા દમ્ભાસુરવરપ્રદા ।
ધનધાન્યપ્રદા ધન્યા ધનેશ્વરધનપ્રદા ॥ ૧૮-૧૩૭॥

ધર્મપત્ની ધર્મરતા ધર્માધર્મવિવિવર્દ્ધિની ।
ધર્મિણી ધર્મિકા ધર્મ્યા ધર્માધર્મવિવર્દ્ધિની ॥ ૧૮-૧૩૮॥

ધનેશ્વરી ધર્મરતા ધર્માનન્દપ્રવર્દ્ધિની ।
ધનાધ્યક્ષા ધનપ્રીતા ધનાઢ્યા ધનતોષિતા ॥ ૧૮-૧૩૯॥

ધીરા ધૈર્યવતી ધિષ્ણ્યા ધવલામ્ભોજસંનિભા ।
ધરિણી ધારિણી ધાત્રી ધૂરણી ધરણી ધરા ॥ ૧૮-૧૪૦॥

ધાર્મિકા ધર્મસહિતા ધર્મનિન્દકવર્જિતા ।
નવીના નગજા નિમ્ના નિમ્નનાભિર્નગેશ્વરી ॥ ૧૮-૧૪૧॥

નૂતનામ્ભોજનયના નવીનામ્ભોજસુન્દરી ।

નાગરી નગરજ્યેષ્ઠા નગરાજસુતા નગા ॥ ૧૮-૧૪૨॥

નાગરાજકૃતતોષા નાગરાજવિભૂષિતા ।
નાગેશ્વરી નાગરૂઢા નાગરાજકુલેશ્વરી ॥ ૧૮-૧૪૩॥

નવીનેન્દુકલા નાન્દી નન્દિકેશ્વરવલ્લભા ।
નીરજા નીરજાક્ષી ચ નીરજદ્વન્દ્વલોચના ॥ ૧૮-૧૪૪॥

નીરા નીરભવા વાણી નીરનિર્મલદેહિની ।
નાગયજ્ઞોપવીતાઢ્યા નાગયજ્ઞોપવીતિકા ॥ ૧૮-૧૪૫॥

નાગકેસરસંતુષ્ટા નાગકેસરમાલિની ।
નવીનકેતકીકુન્દ ? મલ્લિકામ્ભોજભૂષિતા ॥ ૧૮-૧૪૬॥

નાયિકા નાયકપ્રીતા નાયકપ્રેમભૂષિતા ।
નાયકપ્રેમસહિતા નાયકપ્રેમભાવિતા ॥ ૧૮-૧૪૭॥

નાયકાનન્દનિલયા નાયકાનન્દકારિણી ।
નર્મકર્મરતા નિત્યં નર્મકર્મફલપ્રદા ॥ ૧૮-૧૪૮॥

નર્મકર્મપ્રિયા નર્મા નર્મકર્મકૃતાલયા ।
નર્મપ્રીતા નર્મરતા નર્મધ્યાનપરાયણા ॥ ૧૮-૧૪૯॥

પૌષ્ણપ્રિયા ચ પૌષ્પેજ્યા પુષ્પદામવિભૂષિતા ।
પુણ્યદા પૂર્ણિમા પૂર્ણા કોટિપુણ્યફલપ્રદા ॥ ૧૮-૧૫૦॥

પુરાણાગમગોપ્યા ચ પુરાણાગમગોપિતા ।
પુરાણગોચરા પૂર્ણા પૂર્વા પ્રૌઢા વિલાસિની ॥ ૧૮-૧૫૧॥

પ્રહ્લાદહૃદયાહ્લાદગેહિની પુણ્યચારિણી ।
ફાલ્ગુની ફાલ્ગુનપ્રીતા ફાલ્ગુનપ્રેધારિણી ॥ ૧૮-૧૫૨॥

ફાલ્ગુનપ્રેમદા ચૈવ ફણિરાજવિભૂષિતા ।
ફણિકાઞ્ચી ફણિપ્રીતા ફણિહારવિભૂષિતા ॥ ૧૮-૧૫૩॥

ફણીશકૃતસર્વાઙ્ગભૂષણા ફણિહારિણી ।
ફણિપ્રીતા ફણિરતા ફણિકઙ્કણધારિણી ॥ ૧૮-૧૫૪॥

ફલદા ત્રિફલા શક્તા ફલાભરણભૂષિતા ।
ફકારકૂટસર્વાઙ્ગી ફાલ્ગુનાનન્દવર્દ્ધિની ॥ ૧૮-૧૫૫॥

વાસુદેવરતા વિજ્ઞા વિજ્ઞવિજ્ઞાનકારિણી ।
વીણાવતી બલાકીર્ણા બાલપીયૂષરોચિકા ॥ ૧૮-૧૫૬॥

બાલાવસુમતી વિદ્યા વિદ્યાહારવિભૂષિતા ।
વિદ્યાવતી વૈદ્યપદપ્રીતા વૈવસ્વતી બલિઃ ॥ ૧૮-૧૫૭॥

બલિવિધ્વંસિની ચૈવ વરાઙ્ગસ્થા વરાનના ।
વિષ્ણોર્વક્ષઃસ્થલસ્થા ચ વાગ્વતી વિન્ધ્યવાસિની ॥ ૧૮-૧૫૮॥

ભીતિદા ભયદા ભાનોરંશુજાલસમપ્રભા ।
ભાર્ગવેજ્યા ભૃગોઃ પૂજ્યા ભરદ્વારનમસ્કૃતા ॥ ૧૮-૧૫૯॥

ભીતિદા ભયસંહન્ત્રી ભીમાકારા ચ સુન્દરી ।
માયાવતી માનરતા માનસમ્માનતત્પરા ॥ ૧૮-૧૬૦॥

માધવાનન્દદા માધ્વી મદિરામુદિતેક્ષણા ।
મહોત્સવગુણોપેતા મહતી ચ મહદ્ગુણા ॥ ૧૮-૧૬૧॥

મદિરામોદનિરતા મદિરામજ્જને રતા ।
યશોધરી યશોવિદ્યા યશોદાનન્દવર્દ્ધિની ॥ ૧૮-૧૬૨॥

યશઃકર્પૂરધવલા યશોદામવિભૂષિતા ।
યમરાજપ્રિયા યોગમાર્ગાનન્દપ્રવર્દ્ધિની ॥ ૧૮-૧૬૩॥

યમસ્વસા ચ યમુના યોગમાર્ગપ્રવર્દ્ધિની ।
યાદવાનન્દકર્ત્રી ચ યાદવાનન્દવર્દ્ધિની ॥ ૧૮-૧૬૪॥

યજ્ઞપ્રીતા યજ્ઞમયી યજ્ઞકર્મવિભૂષિતા ।
રામપ્રીતા રામરતા રામતોષણતત્પરા ॥ ૧૮-૧૬૫॥

રાજ્ઞી રાજકુલેજ્યા ચ રાજરાજેશ્વરી રમા ।
રમણી રામણી રમ્યા રામાનન્દપ્રદાયિની ॥ ૧૮-૧૬૬॥

રજનીકરપૂર્ણાસ્યા રક્તોત્પલવિલોચના ।
લાઙ્ગલિપ્રેમસંતુષ્ટા લાઙ્ગલિપ્રણયપ્રિયા ॥ ૧૮-૧૬૭॥

લાક્ષારુણા ચ લલના લીલા લીલાવતી લયા ।
લઙ્કેશ્વરગુણપ્રીતા લઙ્કેશવરદાયિની ॥ ૧૮-૧૬૮॥

લવઙ્ગીકુસુમપ્રીતા લવઙ્ગકુસુમસ્રજા ।
ધાતા વિવસ્વદ્દૃહિણી વિવસ્વત્પ્રેમધારિણી ॥ ૧૮-૧૬૯॥

શવોપરિસમાસીના શવવક્ષઃસ્થલસ્થિતા ।
શરણાગતરક્ષિત્રી શરણ્યા શ્રીઃ શરદ્ગુણા ॥ ૧૮-૧૭૦॥

ષટ્કોણચક્રમધ્યસ્થા સમ્પદાર્થનિષેવિતા ।
હૂંકારાકારિણી દેવી હૂંકારરૂપશોભિતા ॥ ૧૮-૧૭૧॥

ક્ષેમઙ્કરી તથા ક્ષેમા ક્ષેમધામવિવર્દ્ધિની ।
ક્ષેમામ્નાયા તથાજ્ઞા ચ ઇડા ઇશ્વરવલ્લભા ॥ ૧૮-૧૭૨॥

ઉગ્રદક્ષા તથા ચોગ્રા અકારાદિસ્વરોદ્ભવા ।
ૠકારવર્ણકૂટસ્થા ૠકારસ્વરભૂષિતા ॥ ૧૮-૧૭૩॥

એકારા ચ તથા ચૈકા એકારાક્ષરવાસિતા ।
ઐષ્ટા ચૈષા તથા ચૌષા ઔકારાક્ષરધારિણી ॥ ૧૮-૧૭૪॥

અં અઃકારસ્વરૂપા ચ સર્વાગમસુગોપિતા ।
ઇત્યેતત્ કથિતં દેવિ તારાનામસહસ્રકમ્ ॥ ૧૮-૧૭૫॥

ય ઇદં પઠતિ સ્તોત્રં પ્રત્યહં ભક્તિભાવતઃ ।
દિવા વા યદિ વા રાત્રૌ સન્ધ્યયોરુભયોરપિ ॥ ૧૮-૧૭૬॥

સ્તવરાજસ્ય પાઠેન રાજા ભવતિ કિઙ્કરઃ ।
સર્વાગમેષુ પૂજ્યઃ સ્યાત્ સર્વતન્ત્રે સ્વયં હરઃ ॥ ૧૮-૧૭૭॥

શિવસ્થાને શ્મશાને ચ શૂન્યાગારે ચતુષ્પથે ।
ય પઠેચ્છૃણુયાદ્ વાપિ સ યોગી નાત્ર સંશયઃ ॥ ૧૮-૧૭૮॥

યાનિ નામાનિ સન્ત્યસ્મિન્ પ્રસઙ્ગાદ્ મુરવૈરિણઃ ।
ગ્રાહ્યાણિ તાનિ કલ્યાણિ નાન્યાન્યપિ કદાચન ॥ ૧૮-૧૭૯॥

હરેર્નામ ન ગૃહ્ણીયાદ્ ન સ્પૃશેત્ તુલસીદલમ્ ।
નાન્યચિન્તા પ્રકર્તવ્યા નાન્યનિન્દા કદાચન ॥ ૧૮-૧૮૦॥

સિન્દૂરકરવીરાદ્યૈઃ પુષ્પૈર્લોહિતકૈસ્તથા ।
યોઽર્ચયેદ્ ભક્તિભાવેન તસ્યાસાધ્યં ન કિઞ્ચન ॥ ૧૮-૧૮૧॥

વાતસ્તમ્ભં જલસ્તમ્ભં ગતિસ્તમ્ભં વિવસ્વતઃ ।
વહ્નેઃ સ્તમ્ભં કરોત્યેવ સ્તવસ્યાસ્ય પ્રકીર્તનાત્ ॥ ૧૮-
૧૮૨॥

શ્રિયમાકર્ષયેત્ તૂર્ણમાનૃણ્યં જાયતે હઠાત્ ।
યથા તૃણં દહેદ્ વહ્નિસ્તથારીન્ મર્દયેત્ ક્ષણાત્ ॥ ૧૮-૧૮૩ ॥

મોહયેદ્ રાજપત્નીશ્ચ દેવાનપિ વશં નયેત્ ।
યઃ પઠેત્ શ{ૃ}ણુયાદ્ વાપિ એકચિત્તેન સર્વદા ॥ ૧૮-૧૮૪ ॥

દીર્ઘાયુશ્ચ સુખી વાગ્મી વાણી તસ્ય વશઙ્કરી ।
સર્વતીર્થાભિષેકેણ ગયાશ્રાદ્ધેન યત્ ફલમ્ ॥ ૧૮-૧૮૫ ॥

તત્ફલં લભતે સત્યં યઃ પઠેદેકચિત્તતઃ ।
યેષામારાધને શ્રદ્ધા યે તુ સાધિતુમુદ્યતાઃ ॥ ૧૮-૧૮૬ ॥

તેષાં કૃતિત્વં સર્વં સ્યાદ્ ગતિર્દેવિ પરા ચ સા ।
ઋતુયુક્તલતાગારે સ્થિત્વા દણ્ડેન તાડયેત્ ॥ ૧૮-૧૮૭ ॥

જપ્ત્વા સ્તુત્વા ચ ભક્ત્યા ચ ગચ્છેદ્ વૈ તારિણીપદમ્ ।
અષ્ટમ્યાં ચ ચતુર્દશ્યાં નવમ્યાં શનિવાસરે ॥ ૧૮-૧૮૮ ॥

સંક્રાન્ત્યાં મણ્ડલે રાત્રૌ અમાવાસ્યાં ચ યોઽર્ચયેત્ ।
વર્ષં વ્યાપ્ય ચ દેવેશિ તસ્યાધીનાશ્ચ સિદ્ધયઃ ॥ ૧૮-૧૮૯ ॥

સુતહીના ચ યા નારી દૌર્ભાગ્યામયપીડિતા ।
વન્ધ્યા વા કાકવન્ધ્યા વા મૃતગર્ભા ચ યાઙ્ગના ॥ ૧૮-૧૯૦ ॥

ધનધાન્યવિહીના ચ રોગશોકાકુલા ચ યા ।
સાપિ ચૈતદ્ મહાદેવિ ભૂર્જપત્રે લિખેત્તતઃ ॥ ૧૮-૧૯૧ ॥

સવ્યે ભુજે ચ બધ્નીયાત્ સર્વસૌખ્યવતી ભવેત્ ।
એવં પુમાનપિ પ્રાયો દુઃખેન પરિપીડિતઃ ॥ ૧૮-૧૯૨ ॥

સભાયાં વ્યસને ઘોરે વિવાદે શત્રુસંકટે ।
ચતુરઙ્ગે ચ તથા યુદ્ધે સર્વત્રારિપ્રપીડિતે ॥ ૧૮-૧૯૩ ॥

સ્મરણાદેવ કલ્યાણિ સંક્ષયં યાન્તિ દૂરતઃ ।
પૂજનીયં પ્રયત્નેન શૂન્યાગારે શિવાલયે ॥ ૧૮-૧૯૪ ॥

બિલ્વમૂલે શ્મશાને ચ તટે વા કુલમણ્ડલે ।
શર્કરાસવસંયુક્તૈર્ભક્તૈર્દુગ્ધૈઃ સપાયસૈઃ ॥ ૧૮-૧૯૫ ॥

અપૂપાપિષ્ટસંયુક્તૈર્નૈવેદ્યૈશ્ચ યથોચિતૈઃ ।
નિવેદિતં ચ યદ્દ્રવ્યં ભોક્તવ્યં ચ વિધાનતઃ ॥ ૧૮-૧૯૬ ॥

તન્ન ચેદ્ ભુજ્યતે મોહાદ્ ભોક્તું નેચ્છન્તિ દેવતાઃ ।
અનેનૈવ વિધાનેન યોઽર્ચયેત્ પરમેશ્વરીમ્ ॥ ૧૮-૧૯૭ ॥

સ ભૂમિવલયે દેવિ સાક્ષાદીશો ન સંશયઃ ।
મહાશઙ્ખેન દેવેશિ સર્વં કાર્યં જપાદિકમ્ ॥ ૧૮-૧૯૮ ॥

કુલસર્વસ્વકસ્યૈવં પ્રભાવો વર્ણિતો મયા ।
ન શક્યતે સમાખ્યાતું વર્ષકોટિશતૈરપિ ॥ ૧૮-૧૯૯ ॥

કિઞ્ચિદ્ મયા ચ ચાપલ્યાત્ કથિતં પરમેશ્વરિ ।
જન્માન્તરસહસ્રેણ વર્ણિતું નૈવ શક્યતે ॥ ૧૮-૨૦૦ ॥

કુલીનાય પ્રદાતવ્યં તારાભક્તિપરાય ચ ।
અન્યભક્તાય નો દેયં વૈષ્ણવાય વિશેષતઃ ॥ ૧૮-૨૦૧ ॥

કુલીનાય મહેચ્છાય ભક્તિશ્રદ્ધાપરાય ચ ।
મહાત્મને સદા દેયં પરીક્ષિતગુણાય ચ ॥ ૧૮-૨૦૨ ॥

નાભક્તાય પ્રદાતવ્યં પથ્યન્તરપરાય ચ ।
ન દેયં દેવદેવેશિ ગોપ્યં સર્વાગમેષુ ચ ॥ ૧૮-૨૦૩ ॥

પૂજાજપવિહીનાય સ્ત્રીસુરાનિન્દકાય ચ ।
ન સ્તવં દર્શયેત્ ક્વાપિ સન્દર્શ્ય શિવહા ભવેત્ ॥ ૧૮-૨૦૪ ॥

પઠનીયં સદા દેવિ સર્વાવસ્થાસુ સર્વદા ।
યઃ સ્તોત્રં કુલનાયિકે પ્રતિદિનં ભક્ત્યા પઠેદ્ માનવઃ
સ સ્યાદ્વિત્તચયૈર્ધનેશ્વરસમો વિદ્યામદૈર્વાક્પતિઃ ।
સૌન્દર્યેણ ચ મૂર્તિમાન્ મનસિજઃ કીર્ત્યા ચ નારાયણઃ
શક્ત્યા શઙ્કર એવ સૌખ્યવિભવૈર્ભૂમેઃ પતિર્નાન્યથા ॥ ૧૮-૨૦૫ ॥

ઇતિ તે કથિતં ગુહ્યં તારાનામસહસ્રકમ્ ।
અસ્માત્ પરતરં સ્તોત્રં નાસ્તિ તન્ત્રેષુ નિશ્ચયઃ ॥ ૧૮-૨૦૬ ॥

ઇતિ શ્રીબૃહન્નીલતન્ત્રે ભૈરવભૈરવીસંવાદે તારાસહસ્રનામનિરૂપણં
અષ્ટાદશઃ પટલઃ ॥ ૧૮ ॥

Proofread byDPD

*tArAsahasranamastotra from Brihannilatantra*

pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*